श्रीभासविरचितं

# स्वप्नवासवदत्तम्

## प्रथमोऽङ्कः

(नान्द्यन्ते ततः प्रविशति सूत्रधारः)

**सूत्रधारः—**

**उदयनवेन्दुसवर्णावासवदत्ताबलौ बलस्य त्वाम् ।**
**पद्मावतीर्णपूर्णौ वसन्तकम्रौ भुजौ पाताम् ॥१॥**

उदयकालिकः यः नवः नूतनः इन्दुः चन्द्रः तेन समानः वर्णः ययोः तौ । आसवेन मद्येन दत्तम् अर्पितम् आसमन्तात् बलं सामर्थ्यं (यद्वा अबलं बलाभावः) याभ्यां तौ । पद्मायाः लक्ष्म्याः अवतीर्णेन अवतारेण (भावे क्तः), यद्वा पद्मस्य कमलस्य अवतीर्णः अवतारः तेन, पूर्णौ समृद्धौ । वसन्तः मधुमासः तद्वत् कम्रौ कमनीयौ । बलस्य बलभद्रस्य । भुजौ बाहू । त्वां युष्मान् सभ्यानित्यर्थः । पातां रक्षताम् ।

अत्र उदयन-वासवदत्ता-पद्मावती-वसन्तकानां प्रधानपात्राणां नामनिर्देशेन मुद्रालंकारः । तल्लक्षणं यथा—सूच्यार्थसूचनं मुद्रा प्रकृतार्थपरैः पदैः ॥१॥

(नान्दी के अनन्तर सूत्रधार का प्रवेश)

**सूत्रधार—**

नवोदित चन्द्रमा के समान उज्ज्वल (उदयनवेन्दुसवर्णौ), मदिरापान से सबल (आसवदत्ताबलौ), कमल के सदृश कोमल (पद्मावतीर्णपूर्णौ), वसन्त-ऋतु के तुल्य सुन्दर (वसन्तकम्रौ) बलराम की भुजाएँ (बलस्य भुजौ) आपकी रक्षा करें (त्वां पाताम्) ॥१॥*

* यहाँ पर 'आसवदत्ताबलौ' का विग्रह इस प्रकार होगा—आसवेन दत्तम् आसमन्तात् बलं याभ्यां तौ । 'आसवदत्ताबलौ' का अन्य अर्थ भी हो सकता है—'मदिरापान से दुर्बल' इस पक्ष में 'आसवदत्ताबलौ' का विग्रह इस प्रकार होगा—आसवेन दत्तम् अबलं याभ्यां तौ ।

'पद्मावतीर्णपूर्णौ' के भी दो अर्थ सम्भव हैं—(१) पद्मस्य अवतीर्णेन पूर्णौ—कमल की अवतीर्ण शोभा वा कोमलता से पूर्ण अर्थात् कमलतुल्य कोमल, अथवा (२) पद्मायाः अवतीर्णेन पूर्णौ—लक्ष्मी की शोभा से युक्त ।

एवमार्यमिश्रान् विज्ञापयामि । अये ! किन्नु खलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते ? अङ्ग ! पश्यामि ।

(नेपथ्ये)

उस्सरह उस्सरह अय्या ! उस्सरह । [उत्सरतोत्सरतार्याः ! उत्सरत]

**सूत्रधारः**—भवतु, विज्ञातम् ।

**भृत्यैर्मगधराजस्य स्निग्धैः कन्यानुगामिभिः ।**
**धृष्टमुत्सार्यते सर्वस्तपोवनगतो जनः ॥२॥**

(निष्क्रान्तः)

**स्थापना ।**

मगधराजस्य (समासान्तष्टच्) मगधाधीशस्य दर्शकस्य । स्निग्धैः स्नेह-पूर्णैः । कन्यां कुमारीं पद्मावतीमिति यावत् अनुगन्तुं सेवितुं शीलं येषां तैः । भृत्यैः सेवकैः । तपोवनगतः तपःसाधनं वनं तपोवनं (मध्यमपदलोपिकर्म०) तद् गतः (द्वितीया श्रितेति तत्पुरुषः) । सर्वः सकलः । जनः लोकः । धृष्टं बलात् । उत्सार्यते दूरीक्रियते ॥२॥

आपलोगों से मेरा यह निवेदन है—अये ! ज्योंही मैं आपलोगों से कुछ कहने लगा, यह कैसी आवाज कान में आ पड़ी ? अच्छा, देखता हूँ ।

(नेपथ्य में)

हटो, हटो; लोगो, हटो ।

**सूत्रधार**—अच्छा, समझ में आ गया ।

मगधराज के (मगधराजस्य) स्नेही (स्निग्धैः) सेवक (भृत्यैः), जो कि राजपुत्री की सेवा के लिए साथ आए हैं (कन्यानुगामिभिः), तपोवन के सभी लोगों को (सर्वः तपोवनगतः जनः) उद्दंडता से(धृष्टम्)हटा रहे हैं (उत्सार्यते) ॥२॥

(सूत्रधार चला जाता है)

(प्रस्तावना समाप्त)

(प्रविश्य)

**भटौ**—उस्सरह उस्सरह अय्या ! उस्सरह । [उत्सरतोत्सरतार्याः ! उत्सरत]

(ततः प्रविशति परिव्राजकवेषो यौगन्धरायण आवन्तिकावेषधारिणी वासवदत्ता च)

**यौगन्धरायणः**—(कर्णं दत्वा) कथमिहाप्युत्सार्यते ?

कुतः—

**धीरस्याश्रमसंश्रितस्य वसतस्तुष्टस्य वन्यैः फलै-**
**र्मानार्हस्य जनस्य वल्कलवतस्त्रासः समुत्पाद्यते ।**
**उत्सिक्तो विनयादपेतपुरुषो भाग्यैश्चलैर्विस्मितः**
**कोऽयं भो निभृतं तपोवनमिदं ग्रामीकरोत्याज्ञया ॥३॥**

---

धीरस्य धैर्ययुक्तस्य । आश्रमं तपोवनं संश्रितस्य आश्रितस्य । वसतः वासं कुर्वतः । वन्यैः वने भवैः । फलैः आम्रादिभिः । तुष्टस्य सन्तोषं प्राप्तस्य । मानार्हस्य मानमर्हतीति मानार्हस्तस्य आदरणीयस्य । वल्कलवतः चीरवाससः । जनस्य लोकस्य । त्रासः भयम् । समुत्पाद्यते जन्यते । भोः इत्यनादरे । उत्सिक्ताः उद्धताः । विनयात् सौजन्यात् । अपेतपुरुषः अपेताः रहिताः पुरुषाः यस्य सः । चलैः अस्थिरैः । भाग्यैः भागधेयैः । विस्मितः गर्वितः । अयं कः पुरुषः । इदं पुरोवर्ति । निभृतं शान्तम् । तपोवनम् आश्रमस्थानम् । आज्ञया उत्सारणादेशेन । ग्रामीकरोति (अभूततद्भावे च्विः) ग्रामसमतां नयति ॥३॥

---

(प्रवेश करके)

**सिपाही**—हटो, हटो; लोगो, हटो ।

(संन्यासी के वेष में यौगन्धरायण और अवन्तिदेश की नारी के वेष में वासवदत्ता का प्रवेश)

**यौगन्धरायण**—(कान लगा कर) क्या यहाँ भी लोगों को हटाया जा रहा है ?

तपोवन में रहने वाले (वसतः), वानप्रस्थ अथवा संन्यासी (आश्रमसंश्रितस्य), वन के फलों से सन्तुष्ट (वन्यैः फलैः तुष्टस्य), सम्मानयोग्य

**वासवदत्ता**—अय्य ! को एसो उस्सारेदि ? [आर्य ! क एष उत्सारयति ?]

**यौगन्धरायणः**—भवति ! यो धर्मादात्मानमुत्सारयति ।

**वासवदत्ता**—अय्य ! णहि एव्वं वत्तुकामा, अहंवि णाम उस्सारइदव्वा होमित्ति ।[आर्य ! नह्येवं वक्तुकामा, अहमपि नामोत्सारयितव्या भवामीति ।]

**यौगन्धरायणः**—भवति ! एवमनिर्ज्ञातानि दैवतान्यप्यवधूयन्ते ।

**वासवदत्ता**—अय्य ! तह परिस्समो परिखेदं ण उप्पादेदि जह अअं परिभवो । [आर्य ! तथा परिश्रमः परिखेदं नोत्पादयति यथायं परिभवः]

**यौगन्धरायणः**—भुक्तोज्झित एष विषयोऽत्रभवत्या, नात्र चिन्ता कार्या । कुतः—

---

(मानार्हस्य), वल्कलधारी (वल्कलवतः) धैर्यशील मनुष्य को (धीरस्य जनस्य) क्योंकर (कुतः) डराया जा रहा है (त्रासः समुत्पाद्यते) ? अहो ! कौन है यह (भोः कोऽयम्) घमंडी पुरुष (उत्सिक्तः), जिसके सेवक उद्दंड हैं (विनयात् अपेतपुरुषः), जो चंचल धनवैभव से गर्वित होकर (चलैः भाग्यैः विस्मितः) इस शान्त तपोवन को (इदं निभृतं तपोवनम्) (अपने) आदेश से (आज्ञया) गाँव-सा बना रहा है (ग्रामीकरोति) ? ।।३।।

**वासवदत्ता**—आर्य ! यह कौन हटा रहा है ?

**यौगन्धरायण**—आर्ये ! जो अपने को धर्म से हटा रहा है ।

**वासवदत्ता**—आर्य ! मेरे कहने का यह तात्पर्य नहीं । मैं पूछती हूँ—क्या मैं भी हटाई जाऊँगी ?

**यौगन्धरायण**—इस प्रकार अनजाने देवताओं का भी तिरस्कार हो जाता है ।

**वासवदत्ता**—आर्य ! परिश्रम मुझे वैसा कष्ट नहीं देता जैसा कि यह अपमान ।

**यौगन्धरायण**—आपने भी इस प्रकार को पहले अपनाया था, अब त्याग दिया । इसकी चिन्ता करना व्यर्थ है । क्योंकि—

पूर्वं त्वयाप्यभिमतं गतमेवमासी-
च्छ्लाघ्यं गमिष्यसि पुनर्विजयेन भर्त्तुः ।
कालक्रमेण जगतः परिवर्त्तमाना
चक्रारपङ्क्तिरिव गच्छति भाग्यपङ्क्तिः ॥४॥

**भटौ**—उस्सरह अय्या ! उस्सरह । [उत्सरतार्याः ! उत्सरत]

(ततः प्रविशति काञ्चुकीयः)

**काञ्चुकीयः**—सम्भषक ! न खलु न खलूत्सारणा कार्या । पश्य—

---

पूर्वं पुरा । त्वयापि भवत्यापि । एवम् ईदृशम् । अभिमतम् इष्टम् । गतं प्रस्थितम् । आसीत् । पुनः भूयः । भर्तुः पत्युः । विजयेन राज्यप्राप्तिलक्षणेन । श्लाघ्यं प्रशंसनीयं यथा स्यात्तथा । गमिष्यसि यास्यसि । कालक्रमेण अनुकूलप्रतिकूलकालानुसारेण । परिवर्तमाना भ्रमन्ती । जगतः लोकस्य । भाग्यपङ्क्तिः दैवपरम्परा । चक्रस्य रथाङ्गस्य अराणां नेमिकाष्ठानां पङ्क्तिरिव श्रेणिरिव गच्छति । यथा चक्रारपङ्क्तिः उपरि अधश्च गच्छति तथैव लोकस्य शुभाशुभानि भाग्यानि समयक्रमेण परिवर्तन्ते । तथा हि—नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण ॥४॥

---

आपको भी (त्वया अपि) पहले (पूर्वम्) इस प्रकार चलना (एवं गतम्) अभीष्ट था (अभिमतम् आसीत्) । पति की विजय होने पर (भर्त्तुः विजयेन) आप फिर (पुनः) (उसी प्रकार) गौरव से चलोगी (श्लाघ्यं गमिष्यसि) । समय के बदलने से (कालक्रमेण) बदलनेवाली (परिवर्त्तमाना) संसार की भाग्यरेखा (जगतः भाग्यपङ्क्तिः) पहिये के अरों की भाँति (चक्रारपङ्क्तिः इव) चलती है (गच्छति) ॥४॥

**सिपाही**—हटो, लोगो, हटो ।

(कंचुकी का प्रवेश)

**कञ्चुकी**—संभषक ! हटाओ नहीं, हटाओ नहीं, देखो—

**यौगन्धरायणः**—(स्वगतम्) एवम्! एषा सा मगधराजपुत्री पद्मावती नाम, या पुष्पकभद्रादिभिरादेशिकैरादिष्टा स्वामिनो देवी भविष्यतीति। ततः—

**प्रद्वेषो बहुमानो वा सङ्कल्पादुपजायते।**
**भर्तृदाराभिलाषित्वादस्यां मे महती स्वता ॥७॥**

**वासवदत्ता**—(स्वगतम्) राअदारिअत्ति सुणिअ भइणिआसिणेहो वि मे एत्थ संपज्जइ। [राजदारिकेति श्रुत्वा भगिनिकास्नेहोऽपि मेऽत्र सम्पद्यते]

(ततः प्रविशति पद्मावती सपरिवारा चेटी च)

---

प्रद्वेषः वैरम्। बहुमानः अत्यादरः। वा। संकल्पात् मनोव्यापारात्। उपजायते उद्भवति। भर्तुः स्वामिनः दाराः भार्या इति भर्तृदाराः (दारशब्दः पुंसि बहुवचने च प्रयुज्यते) तान् अभिलषतीति भर्तृदारालाषी तस्य भावः तस्मात्। मे मम यौगन्धरायणस्य। अस्यां पद्मावत्याम्। महती अनल्पा। स्वता आत्मीयबुद्धिः। अस्तीति शेषः ॥७॥

---

तपस्वियों के धर्मकार्य में विघ्न (तपस्विषु धर्मपीडाम्) नहीं डालना चाहती (नहि इच्छेत्)। यह (एतत्) इसके (अस्याः) कुल का नियम है (कुलव्रतम्) ॥६॥

**यौगन्धरायण**—(मन में) ऐसा! यह वही मगध की राजकुमारी पद्मावती है, जो पुष्पकभद्र आदि ज्योतिषियों के कथनानुसार महाराज उदयन की रानी बनेगी। क्योंकि—

वैर (प्रद्वेषः) अथवा सम्मान (बहुमानो वा) मन की भावना से होता है (संकल्पादुपजायते)। क्योंकि मैं चाहता हूँ कि यह हमारे स्वामी की पत्नी बने अतः (भर्तृदाराभिलाषित्वाद्) इसके प्रति (अस्यां) मेरे मन में आत्मीयता की भावना हो रही है (मे महती स्वता) ॥७॥

**वासवदत्ता**—(मन में) 'पद्मावती राजकुमारी है' यह सुनकर मेरा इस के प्रति बहन का-सा स्नेह भी हो रहा है।

(सखियों-सहित पद्मावती तथा उसकी दासी का प्रवेश)

**चेटी**—एदु एदु भट्टिदारिआ, इदं अस्समपदं पविसदु। [एत्वेतु भर्तृ-दारिका, इदमाश्रमपदं प्रविशतु]

(ततः प्रविशत्युपविष्टा तापसी)

**तापसी**—साअदं राअदारिआए। [स्वागतं राजदारिकायै]

**वासवदत्ता**—(स्वगतम्) इअं सा राअदारिआ। अभिजणाणुरूवं खु से रूवं। [इयं सा राजदारिका। अभिजनानुरूपं खल्वस्या रूपम्।]

**पद्मावती**—अय्ये! वंदामि। [आर्ये! वन्दे]

**तापसी**—चिरं जीव। पविस जादे! तवोवणाणि णाम अदिहिजणस्स सअगेहं। [चिरं जीव। प्रविश जाते! तपोवनानि नामातिथिजनस्य स्वगेहम्]

**पद्मावती**—भोदु भोदु। अय्ये! विस्सत्थम्हि। इमिणा बहुमाणव-अणेण अणुग्गहिदम्हि। [भवतु भवतु। आर्ये! विश्वस्तास्मि। अनेन बहुमान-वचनेनानुगृहीतास्मि]

**वासवदत्ता**—(स्वगतम्) णहि रूवं एव्व, वाआ वि खु से महुरा। [नहि रूपमेव, वागपि खल्वस्या मधुरा]

**तापसी**—भद्दे! इमं दाव भद्दमुहस्स भइणिअं कोच्चि राआ ण वरेदि? [भद्रे! इमां तावद् भद्रमुखस्य भगिनिकां कश्चिद् राजा न वरयति?]

---

**दासी**—आइए, राजकुमारी जी, आइए। इस आश्रम में प्रवेश कीजिए।

(बैठी हुई तापसी का प्रवेश)

**तापसी**—राजकुमारी! आपका स्वागत है।

**वासवदत्ता**—(मन में) यह वही राजकुमारी है। ठीक इसका रूप उच्च कुल के अनुरूप है।

**पद्मावती**—आर्ये! मैं आपको प्रणाम करती हूँ।

**तापसी**—चिरकाल तक जीओ, वत्से! आओ, तपोवन तो अतिथियों का अपना ही घर है।

**पद्मावती**—अच्छा, आर्ये! मैं निश्चिन्त हो गई। आपके इस आदर-वचन से मैं कृतकृत्य हो गई।

**वासवदत्ता**—(मन में) केवल रूप ही नहीं, इसकी वाणी भी मधुर है।

**तापसी**—भद्रे! क्या कोई राजा हमारे भद्रमुख राजा की इस बहन की माँग नहीं करता?

**चेटी**—अत्थि राआ पज्जोदो णाम उज्जइणीए। सो दारअस्स कारणादो दूदसम्पादं करेदि। [अस्ति राजा प्रद्योतो नामोज्जयिन्याः। स दारकस्य कारणाद् दूतसम्पातं करोति]

**वासवदत्ता**—(आत्मगतम्) भोदु भोदु। एसा अ अत्तणीया दाणिं संवुत्ता। [भवतु भवतु। एषा चात्मीयेदानीं संवृत्ता।]

**तापसी**—अर्हा खु इअं आइदी इमस्स बहुमाणस्स। उभआणि राअ-उलाणि महत्तराणि त्ति सुणीअदि। [अर्हा खल्वियमाकृतिरस्य बहुमानस्य। उभे राजकुले महत्तरे इति श्रूयते।]

**पद्मावती**—अय्य ! किं दिट्ठो मुणिजणो अत्ताणं अणुग्गहीदुं। अभि-प्पेदप्पदाणेण तवस्सिजणो उवणिमंतीअदु दाव को किं एत्थ इच्छदित्ति। [आर्य ! किं दृष्टो मुनिजन आत्मानमनुग्रहीतुम् ? अभिप्रेतप्रदानेन तपस्विजन उपनिमन्त्र्यतां तावत् कः किमत्रेच्छतीति।]

**काञ्चुकीयः**—यदभिप्रेतं भवत्या। भो भोः आश्रमवासिनस्तपस्विनः ! शृण्वन्तु शृण्वन्तु भवन्तः, इहात्रभवती मगधराजपुत्री अनेन विस्रम्भेणोत्पादित-विस्रम्भा धर्मार्थमर्थेनोपनिमन्त्रयते।

---

**दासी**—उज्जयिनी का राजा प्रद्योत है। उसने अपने पुत्र के लिए दूत भेजा है।

**वासवदत्ता**—(मन में) यह तो अब मेरी अपनी हो गई।

**तापसी**—सचमुच यह आकृति इस सम्मान के योग्य ही है। सुना जाता है कि दोनों राजकुल बड़े ऊँचे हैं।

**पद्मावती**—आर्य ! क्या कोई ऐसा मुनि मिला है, जो (कुछ वस्तु लेकर) हमें अनुगृहीत करे। जो वस्तु उन्हें चाहिए, वह मिलेगी, ऐसा कहकर मुनियों से पूछो कि कौन-सी वस्तु किसे चाहिए।

**कञ्चुकी**—जैसा आप चाहती हैं, वैसा ही होगा। आश्रमवासी मुनियो ! आप सुन लें कि यह मगधराजकुमारी आपके द्वारा किये गये अभिनन्दन से प्रोत्साहित होकर धर्मलाभ के लिए आपको दान देने के लिए आमन्त्रित करती है—

**कस्यार्थः कलशेन को मृगयते वासो यथानिश्चितं**
**दीक्षां पारितवान् किमिच्छति पुनर्देयं गुरोर्यद् भवेत् ।**
**आत्मानुग्रहमिच्छतीह नृपजा धर्माभिरामप्रिया**
**यद्यस्यास्ति समीप्सितं वदतु तत् कस्याद्य किं दीयताम् ।।८।।**

**यौगन्धरायणः**—(आत्मगतम्) हन्त ! दृष्ट उपायः । (प्रकाशम्) भोः ! अहमर्थी ।

**पद्मावती**—दिट्ठिआ सहलं मे तपोवणाभिगमणं । [दिष्ट्या सफलं मे तपोवनाभिगमनम् ।]

---

कस्य तापसस्य । कलशेन घटेन । अर्थः प्रयोजनम् । कः तापसः । वासः वस्त्रम् । मृगयते वाञ्छति । कः तापसः । यथानिश्चितम् यथाध्यवसितम् । दीक्षाम् अध्ययनं शिक्षामितियावत् । पारितवान् समापितवान् । पुनः भूयः । किं वस्तु । इच्छति ईहते । यत् वस्तु । गुरोः आचार्यस्य । देयं दक्षिणात्वेन दातव्यम् । भवेत् स्यात् । इह अस्मिन् आश्रमे । धर्मे अभिरामः अभिरुचिः येषां ते धर्माभिरामाः धर्मानुरागिणः, ते प्रियाः यस्याः सा, यद्वा धर्मोऽभिरामः प्रियश्च यस्याः सा । नृपजा राजसुता । आत्मानुग्रहं स्वधन्यताम् । इच्छति अभिलषति । यस्य तपस्विनः । यत् वस्तु । समीप्सितम् अभीष्टम् । अस्ति वर्तते । सः तापसः । तद् वस्तु । वदतु कथयतु । अद्य अस्मिन् दिवसे काले वा । कस्य तपस्विनः । किं वस्तु । दीयतां समर्प्यताम् । तदुच्यतामिति शेषः ।।८।।

---

किसे (कस्य) कलश चाहिए (कलशेन अर्थः) ? कौन (कः) वस्त्र चाहता है (वासः मृगयते)? किसने अपनी निश्चित (यथानिश्चितं) शिक्षा को समाप्त किया है (दीक्षां पारितवान्) ? वह क्या चाहता है (पुनः किम् इच्छति) जो उसे गुरुदेव को देना है (यद् गुरोः देयं भवेत्) ? धार्मिक जनों में श्रद्धालु राजकुमारी (धर्माभिरामप्रिया नृपजा) इस आश्रम में (इह) अपना कल्याण (आत्मानुग्रहम्) चाहती है (इच्छति) । जो वस्तु (यद्) जिसे (यस्य) चाहिए (समीप्सितम् अस्ति) वह कहे (तत् वदतु), किसे (कस्य) आज (अद्य) क्या दिया जाय (किं दीयताम्) ? ।।८।।

**यौगन्धरायण**—(मन में) अहा ! मुझे अच्छा उपाय सूझा । (प्रकट) अजी ! मैं प्रार्थी हूँ ।

**पद्मावती**—मैं कृतार्थ हुई । तपोवन में मेरा आना सफल हुआ ।

**तापसी**—संतुट्ठतवस्सिजणं इदं अस्समपदं । आअंतुएण इमिणा होदव्वं । [सन्तुष्टतपस्विजनमिदमाश्रमपदम् । आगन्तुकेमानेन भवितव्यम् ।]

**काञ्चुकीयः**—भोः किं क्रियताम् ?

**यौगन्धरायणः**—इयं मे स्वसा । प्रोषितभर्तृकामिमामिच्छाम्यत्रभवत्या कञ्चित् कालं परिपाल्यमानाम् । कुतः—

**कार्यं नैवार्थैर्नापि भोगैर्न वस्त्रै-**
**र्नाहं काषायं वृत्तिहेतोः प्रपन्नः ।**
**धीरा कन्येयं दृष्टधर्मप्रचारा**
**शक्ता चारित्रं रक्षितुं मे भगिन्याः ॥६॥**

(मम) अर्थैः धनैः । कार्यं प्रयोजनम् । नैव नास्ति । भोगैः भोगसाधनैः द्रव्यविशेषैः । अपि कार्यं न । वस्त्रैः वसनैः । अपि कार्यं न । अहं यौगन्धरायणः । वृत्तिहेतोः जीविकार्थम् । काषायं कषायेण रक्त गैरिकं वस्त्रं परिव्राजकवेषम् इत्यर्थः । न प्रपन्नः नाङ्गीकृतवान् । धीरा पण्डिता मनस्विनी च । दृष्टः अवगतः धर्मस्य प्रचारः आचरणं यया सा । इयं पुरोवर्तिनी । कन्या मगधराजपुत्री । मे मम । भगिन्याः स्वसुः । चारित्रं शीलम् । रक्षितुं पातुम् । शक्ता समर्था ॥६॥

---

**तापसी**—इस आश्रम में तो सब तापस सन्तुष्ट हैं ? यह कोई बाहर से आया होगा ।

**कञ्चुकी**—तो तुम्हें क्या चाहिए ?

**यौगन्धरायण**—यह मेरी बहन है । इसका पति परदेश में गया है । मैं चाहता हूँ कि कुछ समय के लिए आप इसे अपनी देखरेख में रखें । क्योंकि—

मुझे न धन से प्रयोजन है (अर्थैः नैव कार्यम्), न भोग्य वस्तुओं से (नापि भोगैः), न वस्त्रों से (न वस्त्रैः) । जीविका के लिए (वृत्तिहेतोः) मैंने गेरुआ वस्त्र (अहम् काषायम्) नहीं पहना है (न प्रपन्नः) । यह राजकन्या (इयं कन्या) धीर स्वभाव की है (धीरा) । इसकी धर्मख्याति से हम परिचित हैं (दृष्टधर्मप्रचारा) । यह मेरी बहन के चरित्र की (मे भगिन्याः चारित्रं) रक्षा कर सकती है (रक्षितुं शक्ता) ॥६॥

**वासवदत्ता**—(आत्मगतम्) हं, इह मं णिक्खिविदुकामो अय्ययोगंध-रायणो ! होदु, अविआरिअ कमं ण करिस्सदि । [हम्, इह मां निक्षेप्तुकाम आर्ययौगन्धरायणः ! भवतु, अविचार्य क्रमं न करिष्यति ।]

**काञ्चुकीयः**—भवति ! महती खल्वस्य व्यपाश्रयणा । कथं प्रति-जानीमः ? कुतः—

**सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः ।**
**सुखमन्यद् भवेत्सर्वं दुःखं न्यासस्य रक्षणम् ॥१०॥**

**पद्मावती**—अय्य ! पढमं उग्घोसिअ को किं इच्छदित्ति अजुत्त दाणिं विआरिदुं । जं एसो भणादि, तं अणुचिट्ठदु अय्यो । [आर्य ! प्रथममुद्घोष्य कः किमिच्छतीत्ययुक्तमिदानीं विचारयितुम् । यदेष भणति तदनुतिष्ठत्वार्यः ।]

**काञ्चुकीयः**—अनुरूपमेतद् भवत्याभिहितम् ।

---

अर्थः द्रव्यम् । दातुम् अर्पयितुम् । सुखं सुकरम् । भवेत् स्यात् । प्राण असवः दातुम् अर्पयितुं सुखं सुकरम् । तपः तपःफलं दातुम् अर्पयितुम् सुखं सुकरम् । अन्यत् इतरत् । सर्वं सकलम् । दातुम् अर्पयितुम् सुखं सुकरम् । भवेत् स्यात् । परं न्यासस्य निक्षेपस्य । रक्षणं परिपालनम् । दुःखं दुष्करम् ॥१०॥

---

**वासवदत्ता**—(मन में) आर्य यौगन्धरायण मुझे यहीं सौंपना चाहते हैं ! अच्छा, वे बिना सोचे कोई काम न करेंगे ।

**कञ्चुकी**—इसकी यह आश्रय-प्रार्थना बहुत बड़ी है; कैसे मान लें ? क्योंकि—

धन (अर्थः), प्राण (प्राणाः) और तप का फल (तपः) देना सरल है (दातुं सुखम्) । अन्य सब कुछ देना सरल है (अन्यत् सर्वं सुखं भवेत्) । किन्तु धरोहर की रक्षा करना (न्यासस्य रक्षणं) बहुत कठिन है (दुःखम्) ॥१०॥

**पद्मावती**—आर्य ! किसे क्या चाहिए—पहले ऐसी घोषणा करके अब पीछे हटना उचित नहीं है । जो यह कहे वैसा करना होगा ।

**कञ्चुकी**—आपने यह ठीक कहा ।

**चेटी**—चिरं जीवतु भट्टिदारिआ एवं सच्चवादिणी। [चिरं जीवतु भर्तृदारिका एवं सत्यवादिनी]

**तापसी**—चिरं जीवदु भद्दे ! [चिरं जीवतु भद्रे !]

**काञ्चुकीयः**—भवति ! तथा। (उपगम्य) भोः ! अभ्युपगतमत्रभवता भगिन्याः परिपालनमत्रभवत्या।

**यौगन्धरायणः**—अनुगृहीतोऽस्मि तत्रभवत्या। वत्से ! उपसर्पात्रभवतीम्।

**वासवदत्ता**—(आत्मगतम्) का गई। एसा गच्छामि मंदभाआ [का गतिः ? एषा गच्छामि मन्दभागा]

**पद्मावती**—भोदु भोदु। अत्तणीआ दाणिं संवुत्ता। [भवतु भवतु। आत्मीयेदानीं संवृत्ता।]

**तापसी**—जा ईदिसी से आइदी, इयं वि राअदारिअत्ति तक्केमि। [या ईदृश्यस्या आकृतिः, इयमपि राजदारिकेति तर्कयामि]

**चेटी**—सुट्ठु अय्या भणादि। अहं वि अणुहूदसुहत्ति पेक्खामि [सुष्ठु आर्या भणति। अहमप्यनुभूतसुखेति प्रेक्षे।]

---

**दासी**—ऐसी सत्यवक्ता राजकुमारी चिरकाल तक जीवित रहें।

**तापसी**—भद्रे ! चिरकाल तक जिओ।

**कञ्चुकी**—राजकुमारी ! अच्छा। (यौगन्धरायण के पास जाकर) श्रीमन्, श्रीमती ने आपकी बहन की देखभाल करना मान लिया है।

**यौगन्धरायण**—श्रीमती ने मुझ पर बड़ी कृपा की है। बेटी ! इनके पास जाओ।

**वासवदत्ता**—(मन में) क्या करूँ ? मैं अभागिनी अब जाती हूँ।

**पद्मावती**—अच्छा, अब यह अपनी हो गईं।

**तापसी**—इसकी जैसी आकृति है इससे मैं समझती हूँ कि यह भी राजकुमारी है।

**दासी**—आप ठीक कह रही हैं। मैं भी समझती हूँ कि इसने सुख भोगे हैं।